# सुन्दरकाण्ड – सप्तम सर्गः (७) - ॥ पुष्पकदर्शनम् ॥

स वेश्म जालं बलवान् ददर्श
व्यासक्त वैडूर्य सुवर्ण जालम् ।
यथा महत् प्रवृषि मेघजालं
विद्युत् पिनद्धं स विहङ्ग जालम् ॥ १ ॥

निवेशनानां विविधाश्च शालाः
प्रधान शङ्खायुध चापशालाः ।
मनोहराश् चाऽपि पुनर्विशालाः
ददर्श वेश्माद्रिषु चन्द्रशालाः ॥ २ ॥

गृहाणि नाना वसु राजितानि
देवासुरैश् चापि सुपूजितानि ।
सर्वैश्च दोषैः परि वर्जितानि
कपिर् ददर्श स्व बलार्जितानि ॥ ३ ॥

तानि प्रयत्नाभि समाहितानि
मयेन साक्षा दिव निर्मितानि ।
महीतले सर्व गुणोत्तराणि
ददर्श लङ्काधिपते र्गृहाणि ॥ ४ ॥

ततो ददर्शोच्छ्रित मेघरूपं
मनोहरं काञ्चन चारु रूपम् ।
रक्षोऽधिपस् यात्म बलानुरूपं
गृहोत्तमं ह्यप्रति रूप रूपम् ॥ ५ ॥

महीतले स्वर्ग मिव प्रकीर्णं
श्रिया ज्वलन्तं बहुरत्न कीर्णम् ।
नाना तरूणां कुसुमाव कीर्णं
गिरे रिवाग्रं रजसाव कीर्णम् ॥ ६ ॥

नारी प्रवेकै रिव दीप्यमानं
तटिद्भि रम्भोदव दर्च्यमानम् ।
हंस प्रवेकै रिव वाह्यमानं
श्रिया युतं खे सुकृतां विमानम् ॥ ७ ॥

यथा नगाग्रं बहुधातु चित्रं
यथा नभश्च ग्रह चन्द्र चित्रम् ।
ददर्श युक्ती कृत मेघ चित्रं
विमान रत्नं बहुरत्न चित्रम् ॥ ८ ॥

मही कृता पर्वत राजि पूर्णा
शैलाः कृता वृक्ष वितान पूर्णाः ।
वृक्षाः कृताः पुष्प वितान पूर्णाः
पुष्पं कृतं केसर पत्र पूर्णम् ॥ ९ ॥

कृतानि वेश्मानि च पाण्डुराणि
तथा सुपुष्पाण्यपि पुष्कराणि ।
पुनश्च पद्मानि सकेसराणि
धन्यानि चित्राणि तथा वनानि ॥ १० ॥

पुष्पाह्वयं नाम विराजमानं
रत्नप्रभा भिश्च विवर्धमानम् ।

वेश्मोत्त मानामपि चोच्चमानं
महाकपिस्तत्र महा विमानम् ॥ ११ ॥

कृताश्च वैडूर्य मया विहङ्गाः
रूप्य प्रवालैश्च तथा विहङ्गाः ।
चित्राश्च नाना वसुभिर् भुजङ्गाः
जात्यानु रूपास् तु रगाः शुभाङ्गाः ॥ १२ ॥

प्रवाल जाम्बूनद पुष्प पक्षाः
सलील मावर्जित जिह्म पक्षाः ।
कामस्य साक्षादिव भान्ति पक्षाः
कृता विहङ्गाः सुमुखाः सुपक्षाः ॥ १३ ॥

नियुज्यमानास्तु गजाः सुहस्ताः
सकेसराश् चोत्पल पत्रहस्ताः ।
बभूव देवी च कृता सुहस्ता
लक्ष्मीस्तथा पद्मिनि पद्म हस्ता ॥ १४ ॥

इतीव तद् गृह मभिगम्य शोभनं
सविस्मयो नगमिव चारु शोभनम् ।
पुनश्च तत्परम सुगन्धि सुन्दरं
हिमात्यये नगमिव चारु कन्दरम् ॥ १५ ॥

ततः स तां कपि रभिपत्य पूजितां
चरन् पुरीं दशमुख बाहु पालिताम् ।
अदृश्य तां जनक सुतां सुपूजितां
सुदुःखितः पति गुण वेग निर्जिताम् ॥ १६ ॥

ततस्तदा बहुविध भावितात्मनः
कृतात्मनो जनक सुतां सुवर्त्मनः ।
अपश्यतोऽभवदति दुःखितं मनः
सुचक्षुषः प्रविचरतो महात्मनः ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तमः सर्गः ॥ ७ ॥